**अप्रतिम** त्रि॰ नास्ति प्रतिमा उपमा यस्य । अतुल्ये "अनुपमे- "त्वामप्रतिमकर्म्माणमप्रतिद्वन्द्वमाहवे" इति रामायणम् ।

**अप्रतियोगिन्** त्रि॰ नास्ति प्रतियोगी तुल्यरूपः यस्य । स्त्रियां ङीप् । १ अनुपमे । प्रतियोगी अभावसंबन्धी न॰त॰ । २ अभावसम्बन्धिभिन्ने । "अथ वा हेतुमन्निष्ठ- विरहाप्रतियोगिना साध्येन हेतोरेकाधिकरण्यं व्याप्ति रुच्यते" भाषा॰ । यस्याभावः स एव प्रतियोगीति वृद्धाः ।

**अप्रतिरथ** पु॰ नास्ति प्रतिरथः प्रतियोद्धा यस्य । १ प्रति- योधशून्ये । नास्ति प्रतिरथः तुल्यः मङ्गलार्थत्वेनास्य । २यात्रा मङ्गलार्थे सामभेदे । "एष सोऽप्रतिरथोऽथ यः स वृहस्पति- रिति" "ब्रह्मा दक्षिणतोऽप्रतिरथं जपति" इति च शत॰ब्रा॰

**अप्रतिरव** त्रि॰ न प्रतिकूलो रवः प्रतिरवः स नास्ति यत्र । ममेदं द्रव्यं त्वया न भोक्तव्यमित्यादि प्रतिषेधकवचनशून्ये भोगे । "अप्रतिरवं विंशतिवर्षोपभोगनिमित्ता हानि- र्भवति" मिता॰ ।

**अप्रतिरूप** त्रि॰ नास्ति प्रतिरूपस्तुल्यरूपो यस्य । असदृशे ।

**अप्रतिरूपकथा** स्त्री नास्ति प्रतिरूपा प्रत्युत्तरीभूता कथा यस्याः । उत्तरवाक्यरहितायां वाचि । [पराक्रमे ।

**अप्रतिवीर्य्य** त्रि॰ न प्रतिरुद्धं वीर्य्यं यस्य । अन्यैरनिरोध्य

**अप्रतिषिद्ध** त्रि॰ न प्रतिषिद्धम् । अनिषिद्धे "अप्रतिषिद्धमनु- मतं भवतीति" न्यायः सौवर्णराजताम्बरखड्गमणिमय- पात्राणामन्यतमेषु अप्रतिषिद्धेषु वेति" श्रा॰त॰ गोभिलः "अप्रतिषिद्धानि कदलीदृक्षत्वगादीनि" रघु॰ ।

**अप्रतिष्कुत** त्रि॰ प्रति+स्कु—क्त न॰त॰ वेदे षत्वम् । १अप्रतिशब्दिते "स वीरो अप्रतिष्कुतः" ऋ॰ ७,३२,६, "अप्रतिगतोऽप्रतिशब्दितो वा" भा॰ २अप्रतिगते च ।

**अप्रतिष्ठ** न॰ नास्ति प्रतिष्ठा यस्य । १अन्याधारशून्ये स्वधामप्रतिष्ठिते ब्रह्मणि । "स भगवः ! कस्मिन् प्रति- ष्ठितः स्वे महिम्नीति" श्रुतेस्तस्यान्याधारशून्यत्वात्तथात्वम् । २अनाश्रये ३निष्फले । 'सोमविक्रयिणे विष्ठा भिषजे पूय- शोणितम् । नष्टं देवलके दत्तमप्रतिष्ठं तु वार्द्धुषौ" मनुः ४प्रशंसाशून्ये च त्रि॰ । अभावे न॰त॰ । ५प्रशंसाभावे स्त्री । अप्रतिष्ठितमप्यत्र । स च विष्णौ पु॰ । "अपां- निधिरधिष्ठानमप्रमत्तोऽप्रतिष्ठित" इति विष्णु सह॰ ।

**अप्रतिसंख्य** त्रि॰ न प्रतीता संख्या यस्य उत्तरपदलोपः । अयमेकः अयमेक इत्याकारापेक्षाबुद्ध्यभावेन १प्रत्येक- संख्याग्रहणाभावादनुपलब्धसंख्याके वस्तुनि । प्रतिसंख्या बुद्धिविशेषः । अभावे न॰त॰ । २विशेषबुद्ध्यभावे स्त्री ।

**अप्रतिसंख्यानिरोध** पु॰ न प्रतिसंख्यया बुद्ध्या निरोधः । १ बौद्धविशेषकल्पिते अबुद्धिपूर्व्वके भावविनाशे । तद्विशेषः बौद्धशब्दे वक्ष्यते । सोऽयम् प्रतिसंख्यानिरोधः "प्रति- संख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्" शा॰सू॰ प्रत्या- ख्यातः । "अपि च वैनाशिकाः कल्पयन्ति बुद्धिबोध्यं त्रयादन्यत् संस्कृतं क्षणिकञ्चेति" तदपि त्रयं प्रति- संख्याऽप्रतिसंख्यानिरोधावाकाशञ्चेत्याचक्षते । त्रयमपि- चैतदवस्तु अभावमात्रं निरुपाख्यमिति मन्यन्ते बुद्धिपूर्व्वकः किल विनाशोभावानां प्रतिसंख्यानिरोधानाम भाष्यते तद्विपरीतोऽप्रतिसंख्यानिरोधः आवरणाभावमात्रमा- काशमिति प्रतिसंख्याऽप्रतिसंख्यानिरोधयोरप्राप्तिरसम्भ इत्यर्थः । कस्मात् ? अविच्छेदात् तौ हि प्रतिसंख्याऽप्रति- संख्यानिरोधौ सन्तानगोचरौ वा स्याताम् भावगोचरौ वा । न तावत् सन्तानगोचरौ सम्भवतः, सर्व्वेष्वपि सन्तानेषु (ज्ञानप्रवाहेषु) सन्तानिनामविच्छिन्नफलहेतुभावेन सन्तान विच्छेदस्यासम्भवात् नापि भावगोचरौ, नहि निराश्रयो निरुपाख्योविनाशः सम्भवति सर्व्वास्ववस्थासु प्रत्यभिज्ञाबलेन- अन्वयाविच्छेददर्शनात् अदृष्टप्रत्यभिज्ञास्ववस्थासु क्वचिद्दृष्टे नान्वयाविच्छेदेन अन्यत्रापि तदनुमानात् । तस्मात् पर- कल्पितस्य निरोधद्वयस्यानुपपत्तिरिति" शङ्करभाष्यम् ।

**अप्रतिश्रुत** त्रि॰ न॰त॰ । अनङ्गीकृते दातव्यत्वेनास्वीकृते ।

**अप्रतिहत** त्रि॰ न प्रतिहतोऽभिभूतः प्रतिरुद्धो वा न॰त॰ । अन्यैरनभिभूते २अप्रतिरुद्धे च । [२निरवयवे ब्रह्मणि न॰ ।

**अप्रतीक** त्रि॰ नास्ति प्रतीकमेकदेशो यस्य । १ सम्पूर्णे

**अप्रतीक्षा** स्त्री न प्रतीक्षा अपेक्षया कालयापनम् अभावे न॰त॰ । १ प्रतीक्षाभावे कार्य्यजननाय इतरापेक्षया कालयापनाभावे २इतरानपेक्षया त्वरितकरणे । न॰ब॰ । ३प्रतीक्षाशून्ये "अथाप्रतीक्षं पुनरायन्ति" शत॰ब्रा॰ ।

**अप्रतीत** त्रि॰ प्रति+इण—क्त प्रतीतः परिज्ञातः प्रतिगतश्च न॰ त॰ । १ प्रतिगतभिन्ने "सहस्रसां वाजिनमप्रतीतम् ऋ॰१,११७,६,। "अप्रतीतं शत्रुभिरप्रतिगतम्" भा॰ "मरुत्वतो अप्रतीतस्य" ऋ॰ । ५,४२,६, "अप्रतीतस्य" प्रतिगतस्य भा॰ २अपरिज्ञाते 'देवेभिर्विश्वतो अप्रतीतः" ऋ॰ ३,४६,३, "अप्रतीतः एतावदस्य सामर्थ्यमित्य- परिच्छिद्यमानः" भा॰ ३अपलायिते च ।

**अप्रतीति** न॰ अभावे न॰त॰ । ज्ञानाभावे "न स्फोटः प्रतीत्य- प्रतीतिभ्याम्" सां॰ सू॰ ।

**अप्रतीत्त** त्रि॰ प्रति+दा—क्त प्रतीत्तं प्रतिदत्तं न॰त॰ ।